**संस्कृतवार्ता:**

**दिनाङ्क: 30.05.2026**

**प्रात: - 06:55**

**अमितशाहः - भुज**

केन्द्रीय-गृह-मन्त्री अमितशाहः नूतनस्य क्वाड्रिपार्टाईट-सिक्योरिटी-ग्रिड् इत्यस्य प्रवर्तनेन सीमप्रबन्धने प्रमुखस्य परिवर्तनस्य घोषणाम् अकरोत्। सः अवदत् यत्, अस्माकं सीमायाः रक्षणं, अवैधप्रवासस्य निर्मूलनम् च राष्ट्रस्य जनसाङ्ख्यिक्याः रक्षणाय महत्त्वपूर्णम् अस्ति। सः ह्यः गुजरातस्य भुज्-नगरे भारत-पाकिस्तान-सीमायां सामरिकदृष्ट्या महत्वपूर्णानां जी-7 तथा जी-13 बॉर्डर-आउटपोस्ट इत्येतेषाम् उद्घाटनानन्तरं सैनिकान् जनसमूहं च सम्बोधयन् आसीत्।

**म्यान्मार - राष्ट्रपतिः**

म्यान्मार-देशस्य राष्ट्रपतिः यू मिन आङ्ग ह्लाईङ्ग इत्येषः अद्य प्रातः पञ्चदिवसीय भारतयात्रायाम् बिहारस्य गया-नगरं संप्राप्स्यति। तेन सह नैके मन्त्रिमण्डलस्य मन्त्रिणः, वरिष्ठाधिकारिणः, व्यापारनेतारः, उच्च-स्तरीय-प्रतिनिधिदलं च भविष्यति। राष्ट्रपतिः यू मिन आङ्ग ह्लाईङ्ग वर्यस्य एषा प्रथमा भारत-यात्रा भविष्यति। अद्य अपराह्णे राष्ट्रपतिः यू मिन् आङ्ग् ह्लाईङ्ग इत्येषः नवदिल्ल्यां प्राप्स्यति। अद्य सायङ्काले सः विदेशमन्त्रिणा डा. एस. जयशङ्करेण सह मेलनं करिष्यति। श्वः म्यान्मार-देशस्य राष्ट्रपतिः म्यान्मार-भारत-व्यापार-मञ्चे भागं ग्रहीष्यति इत्यपेक्षा अस्ति। सोमवासरे राष्ट्रपतिः यू मिन् आङ्ग् ह्लाईङ्ग वर्यः, प्रधानमन्त्रिणा नरेन्द्रमोदिना सह द्वयोः देशयोः मध्ये ऐतिहासिकं सम्बन्धं सुदृढं कर्तुं चर्चां करिष्यति।

**अन्तर्मन्त्रिमण्डलीय-विवरणम्**

सर्वकारः अवदत् यत् देशे पेट्रोल्, डीज़ल्, एल्. पी. जी. इत्येतेषां पर्याप्तः भण्डारः अस्ति, सर्वे शोधनागाराणि इष्टतमस्तरे एव प्रचलन्ति। नवदिल्ल्याम् अन्तर्मन्त्रिमण्डलीय-विवरणं सम्बोधयन्ती पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्तसचिवा सुजाता शर्मा इत्येषा अवदत् यत् एल. पी. जी. इत्यस्य उत्पादनं सर्वकालिकोच्चतमस्तरे अस्ति यत् प्रतिदिनं प्रायः द्विनवति सहस्र-मेट्रिक्-टन परिमितम् अस्ति। श्रीमती-शर्मा सूचितवती यत् कस्याम् अपि एल. पी. जी. वितरणसंस्थायां शुष्कतायाः सूचना न प्राप्ता।

**प्रधानः - समग्रशिक्षाभियानम्**

केन्द्रीय-शिक्षा-मन्त्रिणा धर्मेन्द्र-प्रधानेन समग्र-शिक्षा-अभियानस्य अन्तर्गतं निधिप्रसारणस्य तस्य उपयोगस्य च विषये विस्तृत-समीक्षा-सभायाः अध्यक्षता कृता, यस्याः लक्ष्यं समग्र-शिक्षा-3.0 अधिकं दक्षं, पारदर्शकं तथा परिणाम-अभिमुखीकरणम् आसीत्।

सामाजिकान्तर्जालीये पटले श्रीप्रधानः अवदत् यत् समग्र-शिक्षा-अभियानम्, पी. एम्.-पोषणम्, उलासः, पी. एम्.-श्री इत्यादीनां प्रमुख-योजनानां एकीकृत-पद्धत्याः प्रसारणम् अस्मिन् एव वर्षे आरभ्यते। सः अवदत् यत् एतेन विद्यालयीय शिक्षाव्यवस्थायां बृहत्तरः समन्वयः प्रभावः च सुनिश्चितः भविष्यति।

**<u>चौहानः - कृषिसम्मेलनम्</u>**

नवदिल्ल्यां अस्य वर्षस्य खरिफ-अभियानस्य कृते कृषिविषयकस्य राष्ट्रिय-सम्मेलनस्य ह्यः द्वितीये दिने प्रसारमाध्यमान् सम्बोधयन् केन्द्रीयकृषिमन्त्री शिवराजसिंह चौहानः अवदत् यत् कृषकाणां कृते बीजानाम् उपलब्धता सुनिश्चेतुं चतुः सप्तति सहस्राधिकैक लक्ष क्विण्टल् परिमितस्य राष्ट्रियबीजसंरक्षणस्य स्थापना कृता अस्ति।

**<u>आई. पी. एल</u>**

आई. पी. एल. क्रिकेट्-क्रीडायां, गतसायं महाराजा यादविन्द्रसिङ्घ्-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडाङ्गणे, न्यू-चण्डीगढनगरे, महत्त्वपूर्णे क्वालीफायर-द्वितीय स्पर्धयां गुजरात-टाईटन्स दलेन, राजस्थान्-रायल्स दलं सप्त स्तोभैः पराजितम्। अधुना गुजरात टाइटन्स दलं श्वः रविवासरे अहमदाबादस्य नरेन्द्र मोदी-क्रीडाङ्गणे निर्णायक-स्पर्धायां रॉयल चैलेंजर्स बेंगलुरु दलेन सह स्पर्धिष्यति।

**।।इति वार्ताः।।**